# M.A. 3rd Semester Examination, 2024

## SANSKRIT

## PAPER—SAN-305(A, B & C)

*Full Marks* : 50

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

### GROUP – A

### (*Literature*)

**सर्वे प्रश्नाः संस्कृतेन नागर्या च समाधेयाः**

**1.** यथानिर्देशमुत्तरं दीयताम्— 10×2

(क) भाक्तवादिनां मतमुपस्थाप्य आनन्दवर्धनाचार्यदिशा तन्निराकरणं विधीयताम् ।

*अथवा*

आनन्दवर्धनाचार्येण ध्वनेः किं लक्षणं लक्षितम् ? तस्य च लक्षणस्य प्रतिपदव्यावृत्तिपूर्वकं व्याख्या कार्या ।

(*ख*) का नाम अर्थप्रकृतिः ? तद्विभागं नामतः उल्लिख्य त्रयाणां स्वरूपं सोदाहरणम् उपस्थाप्यताम् ।

*अथवा*

प्रकरणस्य लक्षणं कृत्वा सोदाहरणं तद्भेदाः प्रतिपादनीयाः ।

2. यथानिर्देशमुत्तरं दीयताम्— 5 × 2

(*क*) यथेच्छं द्वयोः व्याख्या कार्या–

(*i*) सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ।।

(*ii*) काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।।

(*iii*) सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगीशब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ।।

(*ख*) यथेच्छं द्वयोः टीका कार्या — 5 × 2

(*i*) नृत्यम् ।

(*ii*) मुखसन्धिः ।

(*iii*) कथोद्घातः ।

**[ Internal Assessment — 10 Marks ]**

GROUP – B

(*Paniniya Vyakarana*)

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

**1.** एकः प्रश्नः समाधेयः — 10

(*क*) प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् — सप्रसङ्गं व्याख्यायताम् ।

(*ख*) अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय — दीक्षितवचनमिदं सप्रसङ्गं व्याख्यायताम् ।

2. द्वयोः साधनप्रक्रिया प्रदर्श्यताम् — $2\frac{1}{2} \times 2$

(क) शर्वरी

(ख) कुरुचरी

(ग) आर्थिका

3. एकस्य व्याख्या कार्या — 5

(क) पादोऽन्यतरस्याम्

(ख) अभाषितपुंस्काच्च

4. केषाञ्चन चतुर्णां ससूत्रं साधनप्रक्रिया प्रदर्श्यताम् — $2\frac{1}{2} \times 4$

(क) अश्वपत:

(ख) प्राजापत्य:

(ग) उदरिणी

(घ) विदुष्मान्

(ङ) असिल:

(च) यशस्वी

5. द्वयोर्व्याख्या कार्या — 5 × 2

(क) तद्धितेष्वचामादेः

(ख) मादुपधायाश्च मतोर्वोऽयवादिभ्यः

(ग) द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः

**[ Internal Assessment — 10 Marks ]**

## GROUP — C

## (*Indian Philosophy*)

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

1. एकः प्रश्नः समाधेयः — 10

(क) मानमेयोदयः केन विरचितः ? भाट्टमते प्रमाणलक्षणं किम् ? प्रमालक्षणविषये तार्किकैः सह तेषां मतभेदः स्पष्टीक्रियताम् ।

(ख) प्रत्यक्षलक्षणविषये पूर्वपक्षिणां मतखण्डनपूर्वकं भाट्टमतं प्रतिस्थाप्यताम् ।

**2.** द्वयोर्व्याख्या कार्या — 5 × 2

(*क*) तदनन्तयोजनान्तरितेष्वपि शनैश्चरादिषु झटिति दर्शनं वेगमात्रादसम्भाव्यमिति उपेक्षितमस्माभिः ।

(*ख*) एतानि च चक्षुरादीति अनुद्भूतरूपस्पर्शवत्त्वात् प्रत्यक्षेण न गृह्यन्ते इति ।

(*ग*) तस्माद् द्वेधा त्रेधा वा सन्निकर्षः ।

**3.** एकः प्रश्नः समाधेयः — 10

(*क*) वेदान्तमते कतिविधं प्रमाणम् ? कानि च तानि तत्र प्रत्यक्षप्रमाणस्वरूपं वेदान्तमते निरूप्यताम् ।

(*ख*) वेदान्तमते अनुमानलक्षणं किम् ? तत् कतिविधम् ? कानि च तानि ? अनुमानस्यान्वयिरूपत्वं पूर्वपक्षनिरसन-पूर्वकं प्रतिपाद्यताम् ।

**4.** द्वयोर्व्याख्या कार्या — 5 × 2

(*क*) इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः ।

(*ख*) तथाहि त्रिविधं चैतन्यं विषयचैतन्यं, प्रमाणचैतन्यं, प्रमातृचैतन्यं चेति ।

(*ग*) सा च वृत्तिश्चतुर्विधा ।

**[ Internal Assessment – 10 Marks ]**

---